# Datta Manasa Puja

# दत्तमानसपूजा

## Document Information

Text title : Datta Manasa Puja

File name : dattamAnasapUjA.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI, pUjA

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# दत्तमानसपूजा

परानन्दमयो विष्णुर्हृत्स्थोऽवेद्योऽप्यतीन्द्रियः ।
सदा सम्पूज्यते भक्तैर्भगवान् भक्तिभावनः ॥ १॥

अचिन्त्यस्य कुतो ध्यानं कूटस्थावाहनं कुतः ।
क्वासनं विश्वसंस्थस्य पाद्यं पूतात्मनः कुतः ॥ २॥

क्वानर्घोरुक्रमस्यार्घ्यं विष्णोराचमनं कुतः ।
निर्मलस्य कुतः स्नानं क्व निरावरणेऽम्बरम् ॥ ३॥

स्वसूत्रस्य कुतः सूत्रं निर्मलस्य च लेपनम् ।
निस्तृषः सुमनोभिः किं किमक्लेद्यस्य धूपतः ॥ ४॥

स्वप्रकाशस्य दीपैः किं किं भक्ष्याद्यैर्जगद्भृतः ।
किं देयं परितृप्तस्य विराजः क्व प्रदक्षिणाः ॥ ५॥

किमनन्तस्य नतिभिः स्तौति को वागगोचरम् ।
अन्तर्बहिःप्रपूर्णस्य कथमुद्वासनं भवेत् ॥ ६॥

सर्वतोऽपीत्यसम्भाव्यो भाव्यते भक्तिभावनः ।
सेव्यसेवकभावेन भक्तैर्लीलानृविग्रहः ॥ ७॥

तवेशातीन्द्रियस्यापि पारम्पर्याश्रुतां तनुम् ।
प्रकल्प्याश्मादावर्चन्ति प्रार्चयेऽर्चां मनोमयीम् ॥ ८॥

कलसुश्लोकगीतेन भगवन्दत्त जागृहि ।
भक्तवत्सल सामीप्यं कुरु मे मानसार्चने ॥ ९॥

श्रीदत्तं खेचरीमुद्रा-मुद्रितं योगिसद्गुरुम् ।
सिद्धासनस्थं ध्यायेऽभी-वरप्रदकरं हरिम् ॥ १०॥

दत्तात्रेयाह्वयाम्यत्र परिवारैः सहार्चने ।
श्रद्धाभक्त्येश्वरागच्छ ध्यातधाम्नाञ्जसा विभो ॥ ११॥

सौवर्णं रत्नजडितं कल्पितं देवतामयम् ।
रम्यं सिंहासनं दत्त तत्रोपविश यन्त्रिते ॥ १२॥

पाद्यं चन्दनकर्पूर-सुरभि स्वादु वारि ते ।
गृहाण कल्पितं तेन दत्ताङ्घ्री क्षालयामि ते ॥ १३॥

गन्धाब्जतुलसीबिल्व-शमीपत्राक्षतान्वितम् ।
साम्ब्वर्घ्यं स्वर्णपात्रेण कल्पितं दत्त गृह्यताम् ॥ १४॥

सुस्वाद्वाचमनीयाम्बु हैमपात्रेण कल्पितम् ।
तुभ्यमाचम्यतां दत्त मधुपर्कं गृहाण च ॥ १५॥

पुष्पवासितसत्तैलमङ्गेष्वालिप्य दत्त भोः ।
पञ्चामृतैश्च गाङ्गाद्भिः स्नानं ते कल्पयाम्यहम् ॥ १६॥

भक्त्या दिगम्बराचान्तजलेदं दत्त कल्पितम् ।
काषायपरिधानं तद् गृहाणैणेयचर्म च ॥ १७॥

नानासूत्रधरैते ते ब्रह्मसूत्रे प्रकल्पिते ।
गृहाण दैवतमये श्रीदत्त नवतन्तुके ॥ १८॥

भूतिमृत्स्नासुकस्तूरी-केशरान्वितचन्दनम् ।
रत्नाक्षताः कल्पितास्त्वामलङ्कुर्वेऽथ दत्त तैः ॥ १९॥

सच्छमीबिल्वतुलसी-पत्रैः सौगन्धिकैः सुमैः ।
मनसा कल्पितैर्नानाविधैर्दत्तार्चयाम्यहम् ॥ २०॥

लाक्षासिताभ्रश्रीवास-श्रीखण्डागरुगुग्गुलैः ।
युक्तोऽग्नियोजितो धूपो हृदा स्वीकुरु दत्त तम् ॥ २१॥

स्वर्णपात्रे गोघृताक्त-वर्तिप्रज्वालितं हृदा ।
दीपं दत्त सकर्पूरं गृहाण स्वप्रकाशक ॥ २२॥

सषड्रसं षड्विधान्नं नैवेद्यं गव्यसंयुतम् ।
कल्पितं हैमपात्रे ते भुङ्क्ष्व दत्ताम्ब्वदः पिब ॥ २३॥

प्रक्षाल्यास्यं करौ चाद्भिर्दत्ताचम्य प्रगृह्यताम् ।
ताम्बूलं दक्षिणां हैमीं कल्पितानि फलानि च ॥ २४॥

नीराज्य रत्नदीपैस्त्वां प्रणम्य मनसा च ते ।
परितस्त्वत्कथोद्घातैः कुर्वे दत्त प्रदक्षिणाः ॥ २५॥

मन्त्रवन्निहितो मूर्ध्नि दत्त ते कुसुमाञ्जलिः ।
कल्प्यन्ते मनसा गीत-वाद्यनृत्योपचारकाः ॥ २६॥

प्रेर्यमाणप्रेरकेण त्वया दत्तेरितेन ते ।
कृतेयं मनसा पूजा श्रीमंस्तुष्टो भवानया ॥ २७॥

दत्त मानसतल्पे मे सुखनिद्रां रहः कुरु ।
रम्ये व्यायतभक्त्यामतूलिकाढ्ये सुवीजिते ॥ २८॥

इति श्रीवासुदेवानन्दसरस्वतीविरचिता दत्तमानसपूजा सम्पूर्णा ।

---

*Datta Manasa Puja*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*